कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

Complete mss
25-6-78

॥ अथ श्रीलक्ष्मीनृसिंहपूजापद्धतिः ॥

यंप्रयत्नेनप्रातर्नित्यंमुमुक्षुभिः॥४॥समुद्रवसनेदेविपर्वतस्तनमंडले॥विष्णुपत्न्येन
मस्तुभ्यंपादस्पर्शंक्षमस्वमे॥इतिभूमिंप्रार्थ्यश्वासानुसारेणतस्यांपादंनिधायश्रीलक्ष्मी
नृसिंहइत्युदीर्योत्थायपदेपदेअस्त्रमंत्रंस्मरन्नयामाद्बहिःनैर्ऋत्यांयाम्यांवादिशि श
रप्रक्षेपमात्रांभुवमतीत्यदूरेगत्वा॥उत्तिष्ठंत्वपयोदेवागंधर्वायक्षराक्षसाः॥परित
स्त्यज्यताःस्थानंविण्मूत्रोत्सर्जनायमे॥इतिमंत्रंपठित्वातृणलोष्ठप्रक्षेपणतदेवादी
नुद्घास्ययथाविधिमलमूत्रोत्सर्गमुद्धृतजलैःशौचंकुर्यात्॥विधिवन्मृत्तिकाशौचं
विधाय॥तृणपर्णादिनादंतान्जिह्वांचसंशोध्यइतिशौचविधिः॥अथअजपावि
धिः॥पूर्वेद्युरहोरात्रावाचरितस्यमुच्छ्वासनिश्वासात्मकंषट्शताधिकएकविंश २
तिसहस्त्रसंख्याकमजपाजपंमूलाधारस्वाधिष्ठानमणिपूरकमनाहतविशुद्धा

ब्रह्मरंध्रेषुचतुर्दलषट्दलदशादलद्वादशदलषोडशदलद्विदलसहस्त्रदलेषुस्वर्णविद्रुमनील
पिंगलधूम्रविद्युत्कर्पूरवर्णेषुस्थितेभ्योगणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्मगुरुपादु
केषुयथाभागशः समर्पयिष्यामिनमः ॥ मूलाधारचक्रस्थायगणपतयेअजपाजपानांष
ट्शतानिसमर्पयिष्यामिनमः ॥ स्वाधिष्ठानचक्रस्थायब्रह्मणेअजपाजपानांषट्सहस्त्रा
णिसमर्प॰ मणिपूरकचक्रस्थायविष्णवेअजपाजपानांषट्सहस्त्राणिसमर्प॰ अनाहतचक्र
स्थायरुद्रायअजपाजपानांषट्सहस्त्राणिसमर्प॰ विशुद्धचक्रस्थायजीवात्मनेअजपाज
पानांसहस्त्रंसमर्प॰ आज्ञाचक्रस्थायपरमात्मनेअजपाजपानांसहस्त्रंसमर्प॰ स्वब्रह्मरंध्र
स्थश्वेतसहस्त्रदलकमलकर्णिकामध्यवर्तिन्येश्रीगुरुपादुकायैअजपाजपानांसहस्त्रंस
मर्पयामिनमः ॥ इत्यजपाजपंसमर्प्य ॥ प्राणानायम्यसंकल्प्य ॥ अद्यसूर्योदयमारभ्यो

च्छ्रा सनिश्वासात्मकं षट्शताधिकैकविंशतिसहस्रसंख्याकमजपाजपमहं कुर्विष्ये॥ अ
स्यश्रीअजपामहामंत्रस्य॥ हंसायऋषयेनमः शिरसि॥ अव्यक्तगायत्रीछंदसेनमः
मुखे॥ परमहंसायदेवतायैनमः हृदि॥ हंबीजायनमः गुह्ये॥ सः शक्तयेनमः पादयोः
सोहंकीलकायनमः नाभौ॥ हेमायवर्णायनमः सर्वांगे॥ उदात्तस्वरायनमः कंठे॥ मो
क्षार्थेजपेविनियोगः॥ हसां सूर्यात्मनेअंगु० हृद०॥ हसीं सोमात्मनेतर्जं० शिरसे०॥
हसूं निरंजनात्मनेमध्यमाभ्यां० शिखा०॥ हसैं निराभासात्मनेअना० कव०॥ हसौं अ
तनुसूक्ष्मप्रचोदयात्मनेकनि० नेत्र०॥ हसः अव्यक्तबोधात्मनेकरत० अस्त्राय०॥
ध्यानं॥ योमूर्धानंयस्यविप्रावदंतिखंवैनाभिंचंद्रसूर्यौचनेत्रे॥ दिग्भिः श्रोत्रेयस्य
पादौक्षितिश्चध्यातव्योसौसर्वभूतांतरात्मा॥ मानसैरुपचारैः संपूज्य॥ हंसइतिमंत्रं 3

यथाशक्तिं जपेत्॥ इत्यजपाविधिः॥ अहं हरिर्न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक्॥ सच्चि

दानंदरूपोऽहं रूपश्चित्स्वरूपतः॥ इति भावना॥ त्रैलोक्यचैतन्यमयादिदेव श्रीनाथ

विष्णो भवदाज्ञयैव॥ प्रातः समुत्थाय तव प्रियार्थं संसारयात्रामनुवर्तयिष्ये॥ जानामि

धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ नृसिंहदेवेन हृदिस्थितेन यथा नि

युक्तोऽस्मि तथा करोमि॥ कुशतिलयवगंधाक्षतकुसुमधौतवस्त्राण्यादाय मृत्तिकां च

गृहीत्वा जलाशयं गत्वा अस्त्रमंत्राभिमंत्रितजलेन तीरं प्रक्षाल्य तत्रास्त्राभिमंत्रितं

कुशादिकं निधाय स्वशाखोक्तविधिना वैदिकस्नानं विधाय तदंगतर्पणं कृत्वा॥ अ

स्त्रमंत्रेण मृत्तिकामादायास्त्रमंत्रेणाभिमंत्र्य शिखामंत्रेण तृणादिकं निरस्य मूले

न त्रिरभिमंत्र्य तया मृत्तिकया मूर्धादिपादांतं विलिप्य॥ आधारः सर्वभूतस्य विष्णो

रवुत्वतेजसः॥ तद्रूपाश्च ततो जाता आपः स्ताः प्रणमाम्यहं॥ इति तीर्थजलं प्रणम्य॥ व
क्ष्यमाणसंमुखीकरणमुद्रां बध्वा प्राणवायुं निरुध्य जलांतः प्रविश्य तूष्णीं निमज्योन्म
ज्य नाभिमात्रजले स्थित्वा॥ अद्येत्यादि श्रीलक्ष्मीनृसिंहप्रीत्यर्थं तांत्रिकस्नानमहं
करिष्ये॥ इति संकल्पं कृत्वा॥ मूलमंत्रेण प्राणायामत्रयं॥ मूलमंत्रस्य ऋष्यादिकर
षडंगन्यासांश्च कृत्वा स्वपुरतो जले हस्तमात्रं चतुरस्रं परिकल्प्य॥ ब्रह्मांडोदरतीर्था
नि करैः स्पृष्टानि ते रवेः॥ तेन सत्येन देवेश तीर्थं देहि दिवाकर॥ गंगे च यमुने ०कुरु॥ तत्र
चतुरस्रे कर्णिकाग्रेण षट्कोणं कृत्वा षडंगानि विन्यस्य॥ क्रोमित्यंकुशमुद्रया सूर्य
मंडलात् समस्ततीर्थस्वरूपिणं श्रीलक्ष्मीनृसिंहं आवाह्य॥ वमिति द्वादशवारं अ
भिमंत्र्य चक्रधेनुमुद्रे प्रदर्श्य तत्र मूलमालिख्य निमज्य शंखमुद्रया शिरसि तीर्थं गृ ४

हीत्वामूलेन त्रिवारं अर्घ्यंदद्यात्॥ मूलमंत्रेण स्वाहांतेन त्रिरान्वम्य मूलेन त्रिः संतर्प्य
तीर्थं विसृज्य तीरमागत्य धौते वाससी परिधाय द्विराचम्य॥ गोपीचंदनेन ऊर्ध्वपुंड्रं॥
केशवादी निकुर्यात्तैश्चतुर्थ्यंतैर्नमोंतकं॥ ललाटे केशवं ध्यायेन्नारायणमथोदरे॥
माधवं हृदये ध्यायेद्गोविंदं कंठकूबरे॥ उदरे दक्षिणे पार्श्वे विष्णुवात्यं विचिंतयेत्॥
तत्पार्श्वे बाहुमध्ये तु चिंतयेन्मधुसूदनं॥ त्रिविक्रमं तु तत्स्कंधे वामपार्श्वे तु वामनं॥ श्री
धरं बाहुके वामे हृषीकेशं तु कंधरे॥ अपरे पद्मनाभं च हृद्दामोदरं स्मरेत्॥ तत्प्रक्षा
लनतोयेन वासुदेवेति मूर्धनि॥ दक्षिणे तु करे विप्र बिभृयाद्वै सुदर्शनं॥ पद्मं पत्स्यं च वा
परे थ शंखकूर्मंगदां तथा॥ ललाटे तु गदा धार्या मूर्ध्नि चापं शरांस्तथा॥ नंदकं चैव हृ
न्मध्ये शंखचक्रे भुजद्वये॥ शंखचक्रांकितो विप्रः श्मशाने म्रियते पि च॥ प्रयागे या

गतिर्मयाप्रोक्तासागतिस्तस्यनारद॥वैदिकीसंध्यांविधायतांत्रिकीसंध्यांकुर्या
त्॥मूलेनत्रिराचम्यस्पृष्ट्वांभसाखानिस्पृशेत्॥मूलेनैवप्राणायामत्रयंकुर्या
त्॥मूलमंत्रस्यऋष्यादिकरषडंगन्यासान्विन्यस्य॥श्रीलक्ष्मीनृ०र्थंप्रातः
संध्यांकरिष्ये॥स्वपुरतोवमितिधेनुमुद्रयाजलममृतीकृत्यमूलमंत्रेणाऽष्ट
वारमभिमंत्र्यतज्जलबिंदुभिःकुशैरकारादिक्षकारांतैरेकपंचाशदक्षरैःस
बिंदुभिःप्रत्यक्षरंस्वशिरसिप्रोक्ष्यमूलेनचत्रिःप्रोक्ष्य॥सूर्यमंडलेयथोक्तरू
पंदेवंध्यात्वादक्षिणकरेणजलमादायवामकराग्रेणस्पृष्ट्वालंवंरंयंहंइतिपां
चभौतिकबीजैःसप्तवारंअभिमंत्र्यतज्जलंवामकरेनिधायतद्गलितबिंदु
भिर्मूलमंत्रेणदक्षिणकराग्रेणस्वशिरसित्रिःप्रोक्ष्यअवशिष्टंवामकरस्थंज ५

लंवामनासासमीपंनीत्वातेजोमयंवामनासारंध्रेणस्वदेहांतःप्रविश्यतंध्यात्वातेनजलेन
स्वदेहांतस्थसकलकलुषंप्रक्षाल्यकृष्णवर्णंतज्जलंदक्षिणनासारंध्रेणविनिर्गतंविभा
व्यदक्षिणकरेणादायस्ववामभागेवज्रशिलांध्यात्वाॐश्लींपशुहुंफट्॥इतिपाशुप
तास्त्रेणतस्यामास्फाल्यहस्तौप्रक्षाल्यमूलेनत्रिराचम्य॥अंजलिनाजलमादायनृ
सिंहायविद्महेवज्रनखायधीमहि॥तन्नोसिंहःप्रचोदयात्॥श्रीनृसिंहायएषतेर्घः
स्वाहाइतित्रिरर्घांजलिंसूर्याभिमुखमुत्क्षिप्यमूलमुच्चार्यश्रीनृसिंहंतर्पयामिनमः
इतित्रिःसंतर्प्य॥ह्रींह्रींहंसःमार्तंडभैरवायप्रकाशशक्तिसहितायश्रीसूर्यायएषतेअर्घः
स्वाहाइतित्रिः॥सूर्यमंत्रेणत्रिःसंतर्प्य॥सोहमस्मीत्युपस्थाय॥आचम्य॥संध्यांगजपं
कुर्यात्॥ततोगुरुवंदनपूर्वकंप्राणायामऋष्यादिकरषडंगंकृत्वापूर्वोक्तयथाशक्तिगाय

त्रीं जप्त्वा ॥ समर्प्यस्तुत्वा प्रणम्य ॥ सूर्यमंडलाद्देवं स्वहृदि विसृज्य श्री गुरुं प्रणमेत् इति त्रि
षु कालेषु तां त्रिकी संध्या ॥ आचम्य प्राणानायम्य पूजामंडपद्वारं गत्वा ॥ तत्र सामान्यार्घ
विधिना अर्घं संस्थाप्य तीर्थमावाह्य प्रणवेन गंध पुष्पं निक्षिपेत् ॥ धेनुमुद्रां प्रदर्श्य इति
सामान्यार्घविधिः ॥ सामान्यार्घोदकेनास्त्रमंत्रेण द्वारं संप्रोक्ष्य द्वारस्य ऊर्ध्वशाखायां
मध्ये विघ्नराजाय नमः ॥ दक्षिणे महालक्ष्म्यै॰ वामे सरस्वत्यै॰ पुनर्मध्ये द्वारश्रियै॰ द्वार
स्य दक्षिणशाखायां विं विघ्नेशाय॰ वामशाखायां क्षं क्षेत्रपालाय॰ शं शंखनिधिवसु
धराभ्यां॰ पं पद्मनिधिवसुमतीभ्यां॰ नं नंदाय॰ सुं सुनंदाय॰ चं चंडाय॰ प्रं प्रचंडाय॰ बं
बलाय॰ प्रं प्रबलाय॰ भं भद्राय॰ सुं सुभद्राय॰ प्रतिद्वारं द्वि द्वि क्रमेण संपूज्य ॥ पश्चिमद्वारं
गत्वास्त्रमंत्रेण तालत्रयपूर्वकं द्वारमुद्घाट्य ॥ सर्षपाक्षतभस्मकुशकुसुमान्यादायास्त्र
त

६

मंत्रेण समधाभिमंत्र्य अपक्रामंतु भूता नि पिशाचाः ॰ये नरो ॰॰ धकाः ॥ ये चात्र निवसंत्य
न्ये देवता भुवि संस्थिताः ॥ अपसर्प ॰ ज्ञया ॥ इत्यं तेस्त्र मंत्रं जपन् नाराच मुद्र्या मंडपांतः
शक्षिप्य तस्मान्निर्गछतां विघ्नसंघातानां स्ववामांग संकोचेन मार्गं दत्वा स्त्रमंत्रं स्म
रन् वाम पार्ष्णिघात त्रयेण भौमान् ऊर्ध्वोर्ध्वतालत्रयेणांतरिक्षगान् तिग्मदृष्ट्यावलो
कनेन दिव्यान् विघ्नानुत्सार्य दक्षिण पादपुरःसरं देहलीमुल्लंघ्यांतः प्रविश्य वास साव
द्वारमाछाद्य पंचगव्यार्घतोयाभ्यां घंटावादनपूर्वकं मंडपाभ्यंतरं प्रोक्ष्य ॥ मंडपस्य नै
र्ऋति कोणे वास्तुपुरुषाय ॰ तत्रैव वास्त्वधीशाय ब्रह्मणे ॰ इति संपूज्य ॥ मंडपस्य ईशा
न कोणे रक्तवर्णाय रक्तद्वादशशक्तिसहिताय श्रीदीपनाथाय ॰ इति दीपनाथं संपूज्य
अतितीक्ष्ण महाकाय कल्पांत दहनोपम ॥ भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि इति से

खा ड्रां गृहीत्वा अः फट् इति पठन् मंडपमध्यस्थानपूजावेदीं गत्वा ॥ शिरसि मेरुपृष्ठ
ऋषये॰ मुखे सुतलं छंदसे॰ हृदि पृथिव्यै देवतायै॰ इति विन्यस्य ॥ पृथिवीप्रार्थने विनि
योगः इति कृतांजलिरुक्त्वा ॥ ॐ पृथ्वि त्वया॰ कुरु चासनं इति पृथिवीं प्रार्थ्य स्वासन
स्थानं मूलमंत्रेण वीक्ष्य अस्त्रमंत्रेण प्रोक्ष्य तेनैव मंत्रेण कुशैस्त्रिः संताड्य कवचमंत्रे
णाभ्युक्ष्य तत्र मंडूकादि वेदिकांताः पीठदेवताः संपूज्य तत्र चैलाजिनकुशोत्तरं हस्त
द्वयमात्रं चतुरस्रं चतुरंगुलोच्छ्रितं स्वासनमास्तीर्य मूलमंत्रेण द्वादशधाभिमंत्रित
जलेनाभ्युक्ष्य ह्रीं आधारशक्तिकमलासनाय नमः इति स्वासनं संपूज्य तत्र प्राङ्मुख
उदङ्मुखो वा पद्मस्वस्तिकवीरासिद्धान्यतमेनासनेनोपविश्य आसनस्य स्वदक्षिणा
ग्रकोणादि चतुष्कोणेषु प्रादक्षिण्येन गं गणपतये॰ दुं दुर्गायै॰ सं सरस्वत्यै॰ क्षं क्षेत्रपा ७

ळाय॰ इति संपूज्य गंधपुष्पाक्षतादीनि पूजाद्रव्याणि स्वदक्षिणभागे निधाय हां कं
फडिति मंत्रं स्मरन् तानि दिव्यदृष्ट्या विलोक्य कूर्परादिवासितशुद्धोदकपूर्णवामभ
भागस्थं कुंभं आं इति वामपाणिना संस्पृशन् दक्षिणकरांगुल्यग्रेण क्षौं इति कुंभ
स्थं जलं संस्पृशयन् इति दीपशिखां स्पृष्ट्वा करं प्रक्षाल्य कृतांजलिः वामे गुरुभ्यो नमः॰
दक्षिणे गं गणपतये॰ अग्रे श्रीलक्ष्मीनृसिंहाय॰ इति प्रणम्य चंदनसुगंधपुष्पाणि
ह्मिति मंत्रेण आदाय अस्त्रमंत्रेण मर्दयित्वा करौ सुरसीकृत्य तत्पुष्पं वामकरेण स्वमूर्ध्नि
ने परितो रोमि तिभ्रमयित्वा घ्रायहो॥ ते सर्वे विलयं यांतु ये मां हिंसंति हिंसकाः॥
मृत्युरोगभयक्लेशाः पतंतु रिपुमस्तके॥ इति पठित्वा अस्त्रमंत्रेण नाराचमुद्रया ई
शान्यां दिशि दूरे प्रक्षिप्य अस्त्रमंत्रेण पुनः करावन्योन्यमार्जनेन संशोध्य अस्त्रमंत्रे

णो ध्वैंध्वैंताल त्र यं अंगुष्ठतर्जन्यु स्थश ब्देनदशदिग्बंधनंकृत्वा ॥ अस्यश्रीभूतशुद्धि
महामंत्रस्य ॥ अत्रिभरद्वाजब्रह्मेंद्रेश्वरऋषिभ्योनमः शिरसि ॥ गायत्र्युष्णिगनुष्टुप्
बृहतीपंक्तिछंदसेन० मुखे ॥ समीरणाग्निवायुवरुणपृथिव्याकाशदेवताभ्योन०
हृदये ॥ यंबीजाय० गुह्ये ॥ रंशक्तये० पादयोः ॥ यंकीलकाय० सर्वांगे ॥ भूतशुध्दिंन्या
से वि० यंअंगुष्ठाभ्यांहृदया० रंतर्जनीभ्यांशिर० यंमध्यमाभ्यांशिखायै० वंअनामि
काभ्यांकव० लंकनिष्ठिकाभ्यांनेत्र० हंकरत० अस्त्राय० ध्यानं ॥ गमागमस्थंगमना
दिशून्यंचिद्रूपदीपंतिमिरापहारं ॥ पश्यामितेसर्वजनांतरस्थंनमामिहंसंपरमा
त्मरूपं ॥ पापपुरुषस्यशोषणदाहनरेचनप्लावनपिंडीकरणदेहसंस्थापनंकरिष्ये ॥
पादादिजानुपर्यंतपृथिवीस्थानंचतुरस्रंपीतवर्णंअष्टदिक्षुवज्रलांछितंब्रह्मा ९

धिदैवत्यं पंचगुणं निवृत्तिकलारूपं लं बीजयुक्तं ध्यायेत्॥ स्योना मेधातिथिर्भूमिर्गाय
त्री॥ भूमिमंडलशुध्यर्थे जपे वि० ध्यानं॥ विशालावसुधा भूमिरत्नगर्भा रत्नप्रिया॥
विष्णुप्रिया जगद्धात्री तस्यै नित्यं नमो नमः॥ लं स्योना पृथिवी भवानृक्षरा निवेशनी।
॥यच्छा नः शर्म सप्रथाः॥ पादयोः स्पृशेत्॥ जान्वादि नाभिपर्यंतं आपस्थानं तच्चार्धचं
द्राकारं शुक्लवर्णं पद्मलांछितं विष्णुदैवत्यं चतुर्गुणं प्रतिष्ठाकलारूपं वं बीजयुक्तं ध्याये
त्॥ ध्यानं॥ ध्यायामि देवदेवेशं वरुणं च जलाधिपं॥ मकरस्कंधमारूढं कैलासशिख
५ रोपमं॥ शंनो देवीः शंबरीसिंधुद्वीप आपो गायत्री॥ आपावाहने वि० वं शंनो देवीरभि
ष्टय आपो भवंतु पीतये॥ शंयोरभि स्रवंतु नः॥ नाभिं स्पृशेत्॥ नाभ्यादि हृदयपर्यंतं अ
ग्निस्थानं तच्च त्रिकोणाकारं त्रिस्वस्तिकलांछितं रक्तवर्णं त्रिगुणं विद्याकलारूपं रं बी

अग्निं काण्वो मेधातिथिरग्निर्गायत्री ॥ अग्निमंडलशुध्यर्थे० ध्यानं ॥ त्रिनेत्रमारक्ततनुं स्रुक्स्रुवकुंभहस्तं सुवर्णस्रज
मग्निमीडे ॥ वराभयस्वस्तिकहस्तं पद्मस्थयोनिं चसमूहमूलं ॥ रं अग्निं दूतं० क्रतुं ॥ हृदि स्पृशेत् ॥ हृदयादिभ्रूम
शक्ति
जयुक्तं ध्यायेत् ॥ ध्यानं ॥ ध्यायामि देवदेवेशं भूतानां प्राणरूपिणं ॥ सर्वाधारं म
हाबाहुं ब्राह्मणाभ्यांतरचारिणं ॥ कृष्णसारसमारूढं ध्वजायुधसमन्वितं ॥ सप्तसप्ता
त्मभूतिं च त्रैलोक्याधारिणं ॥ तव वायो व्यश्वांगिरसो वायुर्गायत्री ॥ वायुमंडलशु
ध्यर्थे जपे० यं तव वाय ब्रहस्पते त्वष्टुर्जामातरद्भुत ॥ अवांस्या वृणीमहे ॥ वायुमंडला
य भ्रूमध्यं स्पृशेत् ॥ भ्रूमध्यादि ब्रह्मरंध्रपर्यंतं आकाशस्थानं तच्च वृत्ताकारं नीलवर्णं
ध्वजलांछितं सदाशिवं देवत्यं एकगुणं शांत्यातीतकलारूपं हं बीजयुक्तं ध्यायेत् ॥ आदि
त्प्रत्नवत्स आकाशो गायत्री ॥ आकाशमंडलशुध्यर्थे जपे० ॥ ध्यानं ॥ आवाहयामि दे
वेशं ब्रह्मरंध्रनिवासिनं ॥ सदाशिवं महादेवं वृषवाहनसंयुतं ॥ हं आदित्प्रत्नस्य रेतसो
ज्योतिष्पश्यंति वासरं ॥ परो यदिध्यते दिवा ॥ आकाशमंडलाय ब्रह्मरंध्रं स्पृशेत् ॥ धं
ध्यपर्यंतं वायुस्थानं तच्च षट्कोणाकारं षड्बिंदुलांछितं धूम्रवर्णं ईश्वरदेवत्यं द्विगुणं शांतिकलारूपं यं बी
जयुक्तं ध्यायेत् ॥ २

त

पंचमहाभूतान्युसन्नानिविचिंत्य॥ पृथिवीमप्सुप्रविलापयामि॥ आपःअग्नौप्रविला
पयामि॥ अग्निंवायौप्रविलाप० वायुमाकाशेप्र० आकाशंपंचतन्मात्राहंकारमहदा
त्मिकायांब्रह्मस्वरूपायांहृल्लेखाभिधायांप्रकृत्यांप्रविलापयामितांपरब्रह्मणिप्रवि
ला०॥ वामकुक्षौअधस्तात्पापपुरुषंविचिंतयेत्॥ ध्यानं॥ ब्रह्महत्याशिरस्कंचस्वर्ण
स्तेयभुजद्वयं॥ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं॥ तत्संसर्गपदद्वंद्वमंगप्रत्यंगपा
तकं॥ उपपातकरोमाणंरक्तश्मश्रुविलोचनं॥ अचैतनमधोवक्त्रंदग्धपादपसंनिभं॥
खड्गचर्मधरंकृष्णंकुक्षौपापंविचिंतयेत्॥ यमितिवायुबीजेनवामनासापुटेनषोडश
वारंपूरकेणसंशोष्य१६॥ रमित्यग्निबीजेनकुंभकेनचतुःषष्टिवारंसंदह्य६४॥ पुनः
यमितिवायुबीजेनदक्षनासापुटेनद्वात्रिंशद्वारंमोचयेत्३२॥ एवंप्राणायामः॥ एवं

प्राणायामेन शोषणदाहनरेचनं॥ एवं लयः उत्पन्नः॥ पुनः पंचमहाभूतान्युत्पन्नानि वि
चिंत्य॥ ब्रह्मरंध्रे सहस्रारे स्थितपरमात्मनेकीभूयस्थितं जीवात्मानं हंसः सकाशात् प्र
कृतेरुत्पन्नेति ध्यात्वा प्रकृतेः सकाशात्पंचमहाभूतान्युत्पन्नानि विचिंत्य॥ वमित्यमृ
तबीजेन षोडशवारं पूरकेण संशोष्य १६॥ लमिति पृथिवीबीजेन चतुःषष्टिवारं मध्ये कुंभ
कं प्रबोध्य ६४॥ हमित्याकाशबीजेन दक्षिणनाड्या द्वात्रिंशद्वारं मोचयेत्। ३२॥ प्लावनपिं
डीकरणदेहसंस्थापनरूपं प्राणायामः॥ एवं जपं कृत्वा शरीरे भावयेत्॥ आकाशशरीरं ब्र
ह्म। सत्यात्म प्राणारामं मन आनंदं॥ शांतिसमृद्धममृतं॥ इति प्राचीनयोग्योपास्व॥ शि
राद्यवयवीकरणं करिष्ये॥ हं आकाशात्मने शिरसे नमः॥ यं वाय्वात्मने भ्रूमध्याय०॥
रं वह्न्यात्मने हृदयाय०॥ वं अपात्मने नाभ्ये०॥ लं पृथिव्यात्मने पादाभ्यां०॥ इति देहोत्पत्तिं

विचिंत्य॥ ब्रह्मरंध्रे सहस्रारे स्थित परमात्मने कीभूय स्थित परमात्मानं हंसः सोहमिति
मंत्रेण यमिति वायुबीजेन सुषुम्नानाड्या हृदयपंकजं नीत्वा हृदि हस्तं निधाय वमित्य
मृतबीजेन द्वादशावारं जपेत्॥ इति भूतशुद्धिः॥ अस्य श्री प्राणप्रतिष्ठामंत्रस्य॥ ब्रह्मावि
ष्णुमहेश्वरऋषिभ्यो॰ शिर॰॥ गायत्र्युष्णिगनुष्टुबादिछंदसेभ्यो॰ मु॰॥ क्रियामयवपुः
प्राणशक्तिः परोदेवतायै॰ हृद॰॥ ॐ बीजाय॰ ना॰॥ ह्रीं शक्तये॰ पाद॰॥ क्रों कीलकाय॰ स
र्वांगे॥ इष्टार्थे जपे वि॰॥ आं ह्रीं क्रों अं कं खं गं घं ङं॰ आकाशवायुसलिलपृथिव्यात्मने
क्रों ह्रीं आं आं अंगुष्ठाभ्यां हृद॰॥ आं ह्रीं क्रों इं चं छं जं झं ञं शब्दस्पर्शरूपरसगंधात्मने
क्रों ह्रीं आं ईं तर्ज॰ शिर॰॥ आं ह्रीं क्रों उं टं ठं डं ढं णं श्रोत्रत्वक्चक्षुजिह्वाघ्राणात्मने क्रों ह्रीं
आं ऊं मध्य॰ शिखा॰ आं ह्रीं क्रों एं तं थं दं धं नं वाक्पाणिपादपायूपस्थात्मने क्रों ह्रीं आं ऐं

अनामिकाभ्यां कव०॥ आं ह्रीं क्रों ओं पं फं बं भं मं वचनादानगमनविसर्गानंदात्मने क्रों ह्रीं न
आं औं क०नि० नेत्र०॥ आं ह्रीं क्रों अं यं रं लं वं शं षं सं हं ळं क्षं मनोबुध्यहंकारचित्तविज्ञाना
त्मने क्रों ह्रीं आं अः करत० अस्त्रा०॥ ध्यानं॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरू
ढा कराब्जैः पाशं कोदंडमिक्षुद्भवगुणमथ मप्यंकुशं पंचबाणान्॥ बिभ्राणासृक्कपालं
त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा
नः॥ मानसैः संपूज्य॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं ळं क्षं प्राण इह स्थिताः॥ आं० क्षं जीव
इह जीव इह स्थिताः॥ आं० क्षं सर्वेंद्रियाणि॥ आं० क्षं० वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राण सु
खं चिरं तिष्ठंतु स्वाहा॥ असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगं॥ ज्योक्
पश्येम सूर्यमुच्चरंतमनुमते मृळया नः स्वस्ति॥ गर्भाधानादिपंचदशसंस्कारसिध्यर्थं ११

पंचदशाप्रणवावृत्तीः कुरिष्ये॥ ॐ०१५॥ इतिप्राणप्रतिष्ठा॥ अस्यश्रीअंतर्मातृकामंत्रस्य॥ ब्रह्मा
ऋषयेन० शिर०॥ गायत्री छंदसे० मुखे॥ अंतर्मातृकासरस्वतीदेवतायै० हृ०॥ हलोबीजाय०
नाभौ॥ स्वराःशक्तये० पाद०॥ बिंदवः कीलकाय० सर्वांगे॥ अंतर्मातृकान्यासेवि० अंकंखं
गंघंङं आं अंगु० हृद०॥ इंचंछंजंझंञंईतर्ज० शिर०॥ उंटंठंडंढंणंऊंमध्य० शि०॥ एंतंथंदंधं
नंऐंअनामि० कव०॥ ओंपंफंबंभंमंऔंकनि० नेत्र०॥ अंयंरंलंवंशंषंसंहंळंक्षंअः कर० अ
स्त्राय०॥ ध्याने॥ पंचाशद्वर्णरूपेयं कपर्दशशिभूषणा॥ शुद्धस्फटिकसंकाशां शुद्धक्षो
मविराजितां॥ मुक्तावज्रस्फुरद्भूषां जपमालां कमंडलुं॥ पुस्तकं वरदं चैव बिभ्रतीपर
मेश्वरी॥ मानसैः संपूज्य॥ आधारेचतुरस्रे॥ वंन० शंन० षंन० संन० हंसः सोहं॥ लिंगेषट्
दले॥ बं० भं० मं० यं० रं० लंन० हंसः सोहं॥ नाभौदशारे॥ डं० ढं० णं० तं० थं० दं० धं० नं० पं० फं० हंसः

सोहं॥हृदये द्वादशारे कं॰खं॰गं॰घं॰ङं॰न॰चं॰छं॰जं॰झं॰ञं॰टं॰ठं॰हंसः सोहं॥कंठे षोडशारे॥
अं॰आं॰इं॰ईं॰उं॰ऊं॰ऋं॰ॠं॰लृं॰लॄं॰एं॰ऐं॰ओं॰औं॰अं॰अः॰न॰हंसः सोहं॥ललाटे द्विदले॥
हं॰क्षं॰हंसः सोहं॥इति अंतर्मातृकान्यासः॥अस्य श्रीबहिर्मातृकामंत्रस्य॥ब्रह्माऋ
षये॰शि॰गायत्रीछंदसे॰मु॰बहिर्मातृकासरस्वतीदेवतायै॰हृ॰हलोबीजाय॰नाभौ॥स्व
राः शक्तये॰पाद॰बिंदवः कीलकाय॰सर्वांगे॥बहिर्मातृकान्यासे वि॰न्यासस्तु पूर्वव
त्॥ध्यानं॥पंचाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षोदेशां भास्वत्कपर्दाक
लितशशिकलामिंदुकुंदावदातां॥अक्षस्रक्पूर्णकुंभालिखितवरकरां त्रीक्षणां पद्म
संस्थामच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि॥मानसैः संपूज्य॥अं न॰शि
र॰आं॰मु॰इं॰दक्षने॰ईं न॰वामने॰उं॰द॰क॰ऊं॰वा॰क॰ऋं॰दक्षनासापुटे ॠं न॰वामनासापुटे॥ २२

लृं नमः दक्षगंडे॥ ल्हृं नमः वामगंडे॥ एं नमः ऊर्ध्वोष्टे॥ ऐं॰ अधरोष्टे॥ ओं॰ ऊर्ध्व दंतपंक्तौ॥
औं॰ अधोदंतपंक्तौ॥ अं॰ शिरसि॥ अः॰ मुखे॥ कं॰ दक्षबाहुमूले॥ खं॰ दक्षकूर्परे॥ गं॰
दक्षमणिबंधे॥ घं॰ दक्षांगुलिमूले॥ ङं॰ दक्षहस्तांगुल्यग्रे॥ चं॰ वामबाहुमूले॥ छं॰
वामकूर्परे॥ जं॰ वाममणिबंधे॥ झं॰ वामहस्तांगुलिमूले॥ ञं वामहस्तांगुल्यग्रे॥
पा६ टं॰ दक्ष[illegible]मूले॥ ठं॰ दक्षपादजानुनि॥ डं॰ दक्षपादगुल्फे॥ ढं॰ दक्षपादांगुलिमूले
णं॰ दक्षपादांगुल्यग्रे॥ तं॰ वामपादमूले॥ थं॰ वामपादजानुनि॥ दं॰ वामपादगुल्फे॥
धं॰ वामपादांगुलिमूले॥ नं॰ वामपादांगुल्यग्रे॰॥ पं॰ दक्षपार्श्वे॥ फं॰ वामपार्श्वे॥ बं॰
पृष्टे॥ भं॰ नाभौ॥ मं॰ कुक्षौ॥ यं॰ हृदये॥ रं॰ दक्षांसे॥ लं॰ ककुदि॥ वं॰ वामांसे॥ शं॰
हृदयादिदक्षहस्तपर्यंतं॥ षं॰ हृदयादिवामहस्तपर्यंतं॥ सं॰ हृदयादिदक्षपादपर्यंतं॥ हं॰

हृदयादिवामपादपर्यंतं॥कं॰हृ॰जठरपर्यंतं॥क्षं॰हृदयादिवामपादपर्यंतं॥इतिबहि
र्मातृकान्यासः॥ततःसबिंदुकन्यासेऋषिश्छंदश्च पूर्ववत्॥संहारशारदादेव्यंगा
नि बिंदुयुजैःस्वरैः॥अक्षस्रजंहरिणपोतमुदग्रटंकं विद्यांकरैरविरतंदधतींत्रिनेत्रां
॥अर्धेंदुमौलिमरुणामरविंदसंस्थांवर्णेश्वरींप्रणमतस्तनभारनम्रां॥इतिसबिं
दुमातृकाध्यानं॥बिंदुयुक्तांमातृकांतुविन्यसेदनुलोमतः॥तद्यथा॥क्षंक्रोधात्म
ने॰आनने॥कंशात्त्यात्मने॰जठरे॥इत्यादिअंमौलौइत्यंतंन्यसेत्॥इतिसंहार
न्यासः॥अथसृष्टिन्यासः॥अकारादिक्षकारांतंसविसर्गंन्यसेदिति॥स्थिति
न्यासस्तुबिंदुविसर्गयुक्तांडादिठांतानांयथास्थानंविन्यसेदिति॥इतिसबिं
दुकामातृकान्यासः॥स्थानेष्वेतेषथपुनर्मातृकायाःकलान्यसेत्॥अस्यकला

न्यासस्य प्रजापतिर्ऋषिः ॥ दैवीगायत्री छंदः ॥ कलासरस्वती देवता ॥ इष्टार्थे विनि० ॥
ॐ अं ॐ आं हृदया० ॐ इं ॐ ईं शिर० ॐ उं ॐ ऊं शिखा० ॐ एं ॐ ऐं कवचा० ॐ ओं ॐ औं
नेत्रत्रया० ॐ अं ॐ अः अस्त्राय फट् ॥ इति कलाषडंगः ॥ हस्तैः पद्मं रथांगं गुणमथ हरि
णं पुस्तकं वर्णमालां टंकं शूलं कपालं दरममृतलसद्धेमकुंभं वहंतीं ॥ मुक्ताविद्युत्पयो
दस्फटिकनवजपाबंधुरैः पंचवक्त्रैस्त्र्यक्षैर्वक्षोजनम्रां सकलशशिनिभां शारदां तां
नमामि ॥ इति कलादेवीध्यानं ॥ ॐ अं निवृत्त्यै० शि० ॐ आं प्रतिष्ठायै० ॐ इं विद्यायै० ॐ
ईं ईशानायै० ॐ उं इंधिकायै० ॐ ऊं दीपिकायै० ॐ ऋं रेचिकायै० ॐ ॠं मोचिकायै० ॐ
ऌं परायै० ॐ ॡं सूक्ष्मायै० ॐ एं सूक्ष्मामृतायै० ॐ ऐं ज्ञानामृतायै० ॐ ओं आप्यायिन्यै० आ
ॐ औं व्यापिन्यै० ॐ अं व्योमरूपायै० ॐ अः अनंतायै० ॐ कं सृष्ट्यै० ॐ खं ऋद्ध्यै० ॐ

गं स्मृत्यै॰ ॐ घं मेधायै॰ ॐ ङं कांत्यै॰ ॐ चं लक्ष्म्यै॰ ॐ छं द्युत्यै॰ ॐ जं स्थिरायै॰ ॐ झं
स्थित्यै॰ ॐ ञं सिध्यै॰ ॐ टं जरायै॰ ठं पालिन्यै॰ ॐ डं शांत्यै॰ ॐ ढं ऐश्वर्यायै॰ ॐ णं
रत्यै॰ ॐ तं कामिकायै॰ ॐ थं वरदायै॰ ॐ दं ह्लादिन्यै॰ ॐ धं प्रीत्यै॰ ॐ नं दीर्घायै॰
ॐ पं तीक्ष्णायै॰ फं॰ रौद्रायै॰ ॐ बं [illegible] भयायै ॐ भं निद्रायै॰ ॐ मं तंद्र्यै॰ ॐ यं क्षु
धायै॰ ॐ रं क्रोधिन्यै॰ ॐ लं क्रियायै॰ ॐ वं उग्रायै॰ ॐ शं स्मृत्यै॰ ॐ षं पीतायै॰ ॐ
सं श्वेतायै॰ ॐ हं अरुणायै॰ ॐ ळं असितायै॰ ॐ क्षं अनंतायै॰ इति पंचाशत्क
ला न्यासः॥ ॐ अं अमृतायै॰ ॐ आं मानदायै॰ ॐ इं पूषायै॰ ॐ ईं तुष्ट्यै॰ ॐ उं पुष्ट्यै॰
ॐ ऊं रत्यै॰ ॐ ऋं धृत्यै॰ ॐ ॠं शशिन्यै॰ ॐ लृं चंद्रिकायै॰ ॐ ॡं कांत्यै॰ ॐ एं ज्योत्स्ना
यै॰ ॐ ऐं श्रियै॰ ॐ ओं प्रीत्यै॰ ॐ औं अंगदायै॰ ॐ अं पूर्णायै॰ ॐ अः पूर्णामृता १४

ये॰ इत्यंत स्वरस्थानेष्वेव न्यस्तव्याः ॥ ॐ कं भं तपिन्यै॰ ॐ खं भं तापिन्यै॰ ॐ गं फं धूम्रा
यै॰ ॐ घं पं मरीच्यै॰ ॐ ङं नं ज्वालिन्यै॰ ॐ चं धं रुच्यै॰ ॐ छं दं सुषुम्नायै॰ ॐ जं थं भोगदायै॰
ॐ झं तं विश्वायै॰ ॐ ञं णं बोधिन्यै॰ ॐ टं ढं धारिण्यै॰ ॐ ठं डं क्षमायै॰ ॐ दं यं धूम्रायै॰ ॐ
रं उष्मायै॰ ॐ लं ज्वालिन्यै॰ ॐ वं ज्वालमालिन्यै॰ ॐ शं विस्फुलिंगिन्यै॰ ॐ षं सुश्रियै॰
ॐ सं स्वरूपायै॰ ॐ हं कपिलायै॰ एताः हस्तपादसंध्यग्रेषु न्यस्तव्याः ॥ ॐ ळं हव्यवाह
नायै॰ मस्तके ॐ क्षं कव्यवाहनायै॰ व्यापकं इत्यष्ट त्रिंशत्कलान्यासः ॥ मायाद्यैः पुटि
तान्वर्णान्केशवादीनथामरान् ॥ संशान्तिकान्यसेन्मंत्री मस्तकादिक्रमेण तु ॥ तथा
हि केशवादिमातृकान्यासस्य ॥ प्रसाद नारायण ऋषिः ॥ देवीगायत्री छंदः ॥ श्रीलक्ष्मी
नारायणो देवता ॥ हलो बीजं ॥ स्वरः संयहः शक्तिः ॥ इष्टार्थे न्यासे विनि॰ ॐ श्रीं ॐ नमो
नारायणाय हंसः सोहं अं कं ४ आं क्रीं हंसः सोहं ॐ नमो नारायणाय ह्रीं त्रैलोक्याय स्वाहा

श्रांदेव्येइतिहृदयं॥ॐश्रींॐनमोनारायणायहंसःसोहंइंचं४ईंक्लींहंसःसोहंॐनमो
नारायणायमहोल्कायस्वाहाश्रींपद्मिन्यैशिरसेस्वाहा॥ॐश्रींॐनमोनारायणाय
ॐ हंसःसोहंउंटं४ऊंक्लींहंसःसोहंॐनमोनारायणायवीरोल्कायस्वाहाश्रूंविष्णुपत्न्यैशि
खायैवषट्॥ॐश्रींॐनमो०हंसःसोहंएंतं४ऐंक्लींहंसःसोहंॐनमो०विद्युदुल्काय
स्वाहाश्रैंवरदायैइतिकवचायहुं॥ॐश्रींॐनमो०हंसःसोहंओंपं४औंक्लींहंसःसोहंॐ
नमो०सहस्रोल्कायस्वाहाश्रौंकमलरूपायैनेत्रं॥ॐश्रींॐनमो०हंसःसोहंअंयं४अः
क्लींहंसःसोहंॐनमो०अनंतोल्कायस्वाहाश्रःशूलिन्यैइत्यस्त्रं॥इतिकेशवादिमातृ
कान्यासः॥विद्यारविंदमुकुटा मृतपद्मकुंभकौमोदकीदरसुदर्शनशोभिहस्तं॥सौ
दामिनीमुकुटकांतिविकासिलक्ष्मीनारायणात्मकमखंडितमात्ममूर्तिं॥इतिध्या
नं॥ॐक्लींश्रींक्लींअंक्लींश्रींक्लींकेशवायकीर्त्यै०एवंसर्वत्र॥ॐ२आं२नारायणायकांत्यै० १५

वामाधधःकरमारभ्यदक्षिणाधःकरपर्यंतमायुधध्यानं॥

ॐ२ ओं २ वासुदेवाय लक्ष्म्यै ०॥ ४

ॐ२ इं २ माधवाय तुष्ट्यै ० ॐ२ ईं २ गोविंदाय पुष्ट्यै ० ॐ२ उं २ विष्णवे धृत्यै ० ॐ२ ऊं २ मधुसू
दनाय शांत्यै ० ॐ२ ऋं २ त्रिविक्रमाय क्रियायै ० ॐ२ ॠं २ वामनाय दयायै ० ॐ२ लृं २
श्रीधराय मेधायै ० ॐ२ लॄं २ हृषीकेशाय हर्षायै ० ॐ२ एं २ पद्मनाभाय श्रद्धायै ० ॐ२
ऐं २ दामोदराय लज्जायै ० ॐ२ औं २ संकर्षणाय सरस्वत्यै ० ॐ२ अं २ प्रद्युम्नाय प्रीत्यै ०
ॐ२ अः २ अनिरुद्धाय रत्यै ० ॐ२ कं २ चक्रिणे जयायै ० ॐ२ खं २ गदिने दुर्गायै ० ॐ२ गं २
शार्ङ्गिणे प्रभायै ० ॐ२ घं २ खड्गिने सत्यायै ० ॐ२ ङं २ शंखिने चंडायै ० ॐ२ चं २ हलिने
वाण्यै ० ॐ२ छं २ मुसलिने विलासिन्यै ० ॐ२ जं २ शूलिने विजयायै ० ॐ२ झं २ पाशि
नेर विजायै ० ॐ२ ञं २ अंकुशिने विश्वायै ० ॐ२ टं २ मुकुंदाय विमदायै ० ॐ२ ठं २ नंद
५ जाय सुनंदाजाय सुनंदायै ० ॐ२ डं २ नंदिने स्मृत्यै ० ॐ२ ढं २ नारायण ऋद्ध्यै ० ॐ२ णं २
नरकजिते समृद्ध्यै ० ॐ२ तं २ हरये शुद्ध्यै ० ॐ२ थं २ कृष्णाय भुक्त्यै ० ॐ२ दं २ सत्याय मु

त्तये॰ॐ३धं३सत्वायमत्यै॰ॐ३नं३शौरयेक्षमायै॰ॐ३पं३शूरायरमायै॰ॐ३फं३जना
र्दनायउमायै॰ॐ३बं३भूधरायक्लेदिन्यै॰ॐ३भं३विश्वमूर्तयेक्लिन्नायै॰ॐ३मं३वैकुंठायव
सुदायै॰ॐ३यं३त्वगात्मनेपुरुषोत्तमायवसुधायै॰ॐ३रं३असृगात्मनेबलिनेपरा
बलानुजाय ये॰ॐ३लं३मांसात्मनेपरायणायै॰ॐ३वं३मेदात्मनेबालायसूक्ष्मायै॰ॐ३शं३अस्थ्या
त्मनेवृषघ्नायसंध्यायै॰ॐ३षं३मज्जात्मनेवृषायप्रज्ञायै॰ॐ३सं३शुक्रात्मनेहंसाय
प्रभायै॰ॐ३हं३प्राणात्मनेवराहायनिशायै॰ॐ३ळं३क्रियात्मनेशान्त्याविमलायअ
मोघायै॰ॐक्ष्रीं श्रीं क्लीं क्षं क्लीं श्रीं क्ष्रीं परमात्मनेश्रीनरसिंहायनमः॥केशवादिरयंन्या
सोन्यासमात्रेणदेहिनां॥अच्युतत्वंददात्येवसत्यंसत्यंनसंशयः॥इतिकेशवादिमातृ
कान्यासः॥वाङ्मायामादिकंवर्णमातृकायाःसबिंदुकान्॥श्रीकंठादिनथादिसान्यसे
त्स्थानेषुतेषुहि॥श्रीकंठादिमातृकान्यासस्य॥अंबरीषऋषिः॥अनुष्टुप्छंदः॥अथ २६

नारीश्वरो देवता॥ हल्लो बीजानि॥ स्वराः शक्तयः॥ अपाने बिंदवः कीलकं॥ ज्ञानविज्ञा
नार्थे विनि०॥ ॐ ऐं ह्रीं श्रीं अं कं ४ आं अंगु० हृ०॥ ॐ ३ इं चं ४ ईं तर्ज० शिर०॥ ॐ ३ उं टं ४ ऊं
मध्य० शिखा० ॐ ३ ऐं तं ४ ऐं अना० कव०॥ ॐ ३ ओं पं ४ औं क नि० नेत्र०॥ ॐ अं यं ९ अः च
र० अस्त्रा०॥ ध्यानं॥ सिंदूरकांचनसमोभयभागमर्धनारीश्वरं गिरिसुताहरभूष
चिह्नं॥ पाशांकुशा॰क्षवलयेष्टदहस्तमीशं स्मृत्वा न्यसेत्सकलवांछितवस्तुसिध्यै
॥ ॐ ऐं ह्रीं श्रीं अं श्रीकंठेशपूर्णोदरीभ्यां० मस्त०॥ ॐ ३ आं अनंतेशविरजाभ्यां० मुखे॥
ॐ ३ इं सूक्ष्मेशशाल्मलीभ्यां० दक्षने०॥ ॐ ३ ईं त्रिमूर्तीशलोलाक्षीभ्यां० वामने०॥ ॐ ३
उं अमरेशवर्तुलाक्षीभ्यां० दक्षक०॥ ॐ ३ ऊं अर्घीशदीर्घघोणाभ्यां० वामक०॥ ॐ ३
ऋं भारभूतीशसुदीर्घमुखीभ्यां० दक्षना० पु०॥ ॐ ३ ॠं अतिथीशगोमुखीभ्यां० वाम
ना० पु०॥ ॐ ३ लृं स्थाण्वीशदीर्घजिह्वाभ्यां० द० गं०॥ ॐ ३ ॡं हरेशकुंटोदरीभ्यां० वा० गं०॥

ॐ ३ ऍं झंटीशऊर्ध्वकेशीभ्यां० ऊर्ध्वोष्ठे ॥ ॐ ३ ऐं भौतिकेशविकृतिमुखीभ्यां० अधरोष्ठे ॥ ॐ ३
ओं सद्योजातेशज्वालामुखीभ्यां० ऊर्ध्वदंतपंक्तौ ॥ ॐ ३ औं अनुग्रहेशोल्कामुखीभ्यां०
अ० पंक्तौ ॥ ॐ ३ अं अक्रूरेशश्रीमुखीभ्यां० मूर्ध्नि ॥ ॐ ३ अः महासेनेशविद्यामुखीभ्यां०
मुखे ॥ ॐ ३ कं क्रोधीशमहाकालीभ्यां० द० बाहुमूले ॥ ॐ ३ खं चंडेशसरस्वतीभ्यां० कूर्प
रे ॥ ॐ ३ गं पंचांतकेशगौरीभ्यां० मणिबंधे ॥ ॐ ३ घं शिवोत्तमेशत्रैलोक्यविद्याभ्यां० अंगु
लिमूले ॥ ॐ ३ ङं एकरुद्रेशमंत्रशक्तिभ्यां० अंगुल्यग्रे ॥ ॐ ३ चं कूर्मेशशाक्तीभ्यां० वा० बा० मू०
॥ ॐ ३ छं एकनेत्रेशभूतमातृभ्यां० वामकू० ॥ ॐ ३ जं चतुराननेशलंबोदरीभ्यां० वा० म०
ॐ ३ झं अजेशद्राविणीभ्यां० वामांगु० मू० ॥ ॐ ३ ञं सर्वेशनागरीभ्यां० वा० अग्रे ॥ ॐ ३ टं सो
मेश्वरेशखेचरीभ्यां० द० पा० मू० ॐ ३ ठं लांगलीशमंजरीभ्यां० द० जा० ॥ ॐ ३ डं दारुकेशरूप
णीभ्यां० द० गु० ॥ ॐ ३ ढं अर्धनारीश्वरेशवीरिणीभ्यां० द० पा० गु० मू० ॥ ॐ ३ णं उमाकांतेशव ३७

कौं

कोदरीभ्यां॰ द॰पा॰ग्रे॥ ॐ३ तं आषाढीशपूतनाभ्यां॰ वा॰पा॰मू॰॥ ॐ३ थं दंडीशभद्रकालीभ्यां॰
वामोरौ॥ ॐ३ दं अत्रीशयोगिनीभ्यां॰ वा॰गु॰॥ ॐ३ धं मीनेशशंखिनीभ्यां॰ वा॰पा॰अं॰मू॰॥
ॐ३ नं मेषेशगर्जनीभ्यां॰ वा॰पा॰अं॰ग्रे॥ ॐ३ पं लोहितेशकालरात्रिभ्यां॰ द॰पार्श्वे॥ ॐ३ फं
शि॰ रवी॰ शकुब्जिनीभ्यां॰ वा॰पा॰॥ ॐ३ बं छागलेशकपर्दिनीभ्यां॰ पृष्ठे॥ ॐ३ भं द्विरंडे
शवज्रिणीभ्यां॰ नाभौ॥ ॐ३ मं महाकालेशजयाभ्यां॰ कुक्षौ॥ ॐ३ यं त्वगात्मने बालीश
सुमुखेश्वरीभ्यां॰ हृदि॥ ॐ३ रं असृगात्मने भुजंगेशरेवतीभ्यां॰ दक्षांसे॥ ॐ३ लं मांसात्म
ने पिनाकीशमाधवीभ्यां॰ ककुदि॥ ॐ३ वं मेदात्मने खड्गीशवारुणीभ्यां॰ वामांसे॥ ॐ३
शं अस्थ्यात्मने बकेशवायवीभ्यां॰ हृदया[दि]दक्षहस्तांतं॥ ॐ३ षं मज्जात्मने श्वेतेशरक्षो
विदारिणीभ्यां॰ हृ॰वा॰हृ॰तं॥ ॐ३ सं शुक्रात्मने भृग्वीशसहजाभ्यां॰ हृ॰द॰पा॰तं॥ ॐ३ हं जी
वात्मनेनकुलेशलक्ष्मीभ्यां॰ हृ॰वा॰पा॰तं॥ ॐ३ ळं शक्त्यात्मने शिवेशव्यापिनीभ्यां॰ हृ॰नाभ्यंतं॥

रुद्रैर्युक्तांकेवलांवामनूनांकर्मारंभेमातृकांविन्यसेद्बुधः॥२

ॐक्षंक्रोधात्मनेसंवर्तकेशमहामायाभ्यां॰हंसमुखांते॥इतिमातृकाव्यापकं॥इतिश्रीकंठा
दिमातृकान्यासः॥शुद्धासबिंदुकायुक्ताकलाभिःकेशवादिभिः॥श्रीकंठमातृकाचा
त्रन्यासांगेपंचमीस्मृता॥मंत्राःसद्यःकुर्वंतेतस्यसिद्धिंदोषैःसार्धयांतिनाशंजरा
च॥अथतत्त्वंप्रवक्ष्यामितत्त्वन्यासंतदर्थिनां॥यत्तत्त्वन्यासमात्रेणतत्त्वमेवप्रजायते॥
ॐमंनमःपरायजीवात्मने॰ॐभं॰परायप्राणात्मने॰एतद्द्वयंसर्वांगे॥ॐबंनं॰परायबु
ध्यात्मने॰ओंफं॰परायअहंकारात्मने॰ॐपं॰परायरूपात्मने॰एतत्त्रयंहृदि॥ॐनं॰परा
यशब्दात्मनेमूर्ध्नि॥ॐधं॰परायस्पर्शात्मनेमुखे॥ॐदं॰परायरूपात्मनेहृदि॥ॐथं॰
परायपरमात्मने॰रसूपस्थे॥ॐतं॰परायगंधात्मनेपादयोः॥ॐणं॰परायश्रोत्रात्मने॰
श्रोत्रे॥ॐढं॰परायत्वगात्मने॰त्वचि॥ॐडं॰परायचक्षुषात्मने॰चक्षुषोः॥ॐठं॰परा
यजिह्वात्मने॰जिह्वायां॥ॐटं॰परायघ्राणात्मने॰घ्राणे॥ॐञं॰परायवागात्मने॰वाचि॥ १९

ॐ झं॰परायपाण्यात्मने॰पाण्योः॥ॐ जं॰परायपाय्वात्मने॰पायौ॥ॐ ठं॰परायपादात्म
ने॰पादयोः॥ॐ चं॰परायउपस्थात्मने॰उपस्थे॥ॐ ङं॰न॰परायआकाशात्मने॰मूर्ध्नि॥
ॐ घं॰परायबाह्यात्मने॰मुखे॥ॐ गं॰ तेजात्मने॰हृदये॥ॐ खं॰ सलिलात्मने॰गुह्ये॥
ॐ कं॰ पृथिव्यात्मने॰पादयोः॥ॐ शं॰ पुंडरीकात्मने॰ॐ हं॰ सूर्यमंडलायद्वादशकला
त्मने॰ॐ सं॰ सोममंडलायषोडशकलात्मने॰ॐ रं॰ वह्निमंडलायदशकलात्मने॰ए
९ तच्चतुर्यं हृदि॥ॐ षं॰परायपरमेष्ठ्यात्मनेवासुदेवाय॰मूर्ध्नि॥ॐ यं॰परायपुरुषात्म
नेसंकर्षणाय॰मुखे॥ॐ लं॰ रं॰परायविश्वायप्रद्युम्नतत्वात्मने॰हृदि॥ॐ वं॰परा
यनिवृत्यात्मनेअनिरुद्धाय॰गुह्ये॥ॐ क्ष्रौं परायकोपात्मनेनृसिंहाय॰व्यापकं॥
अनलस्याप्यरूपस्यनत्स्वासैहेतुनापुनः॥नत्वन्यासमितिप्राकुर्न्यांसंतत्वविदेबु

ॐ छंनमःपरायसर्वात्मनेनारायणाय॰पादयोः॥२

धाः॥ यः कुर्यात्तत्वविन्यासं पूतो भवति वैध्रुवं॥ तदात्मनानुप्रविश्य भगवानिहति
ष्ठति॥ यतः स एव तत्वानि सर्वं तस्मिन्प्रतिष्ठितं॥ मातृकादेवतयोरंते नमः पदं दाते
व्यं॥ इति तत्वन्यासः॥ तन्मूर्तिपंजरंन्यासं कथयिष्ये शुनापरं॥ यस्मात्परतरं ना
स्ति पुंसस्तन्मूर्तिसिध्धये॥ ॐ अं केशवाय धात्रे॰ ललाटे॥ ॐ नं आं नारायणायार्य
म्णे॰ नाभौ॥ ॐ मों इं माधवाय मित्राय॰ हृ॰॥ ॐ भं ईं गोविंदाय॰ कंठे॥ ॐ गं उं वि
ष्णवे अंशवे॰ द॰ पार्श्वे॥ ॐ वं ऊं मधुसूदनाय भगाय॰ द॰ णांसे॥ ॐ तें एं त्रिविक्रमाय
विवस्वते॰ द॰ स्कं॰॥ ॐ वां ऐं वामनाय इंद्राय॰ वामपार्श्वे॥ ॐ सुं ओं श्रीधराय पूष्णे॰ वा॰
मांसे॥ ॐ दें औं हृषीकेशाय पर्जन्याय॰ वामस्कंधे॥ ॐ वां अं पद्मनाभाय त्वाष्ट्रे॰ पृष्ठे॥
ॐ यं अः दामोदराय विष्णवे॰ ककुदि॥ ॐ नमो भगवते वासुदेवायेति मूर्ध्नि॥ तन्मूर्ति

पंजरन्यासो विहितः परमेष्ठिनै॥ सकृन्न्यासाद्भवेन्मंत्री विष्णुरेवत्तमः॥ इति मूर्तिपंजर मूर्ति
न्यासः॥ ॐ किरीटकेयूरहारमकरकुंडलचक्रशंखगदांबुजहस्तपीतांबरश्रीवत्सांकि
तवक्षस्थलश्रीभूमिसहिताय ज्योतिर्द्वयदीप्तिकराय सहस्रादित्यतेजसे नमः॥ इति मं
त्रः॥ स्वशरीरे परं तेजो व्याप्तं स्मरन् किरीटमुद्रया मूर्ध्नि विन्यसेत्॥ इति किरीटन्यासः
॥ वक्ष्येहमिंद्रियंन्यासमिंद्रियाणां विशुध्धये॥ यथा संज्ञाप्यते विष्णुर्देशिकेन च
धीमता॥ ॐ दिग्भ्यो न॰ श्रोत्रयोः॥ ॐ वायवे॰ त्वचि॥ ॐ आदित्याय॰ चक्षुषोः॥ ॐ वरु
णाय॰ जिह्वा॰॥ ॐ अश्विभ्यां॰ घ्राणे॥ ॐ अग्नये॰ वाचि॥ ॐ इंद्राय॰ पाण्योः॥ ॐ विष्ण
वे॰ पादं॰॥ ॐ मित्राय॰ पायो॥ ॐ प्रजापतये॰ उप॰॥ ॐ चंद्रमसे॰ मनसि॥ ॐ ब्रह्मणे॰
बुध्यो॥ ॐ रुद्राय॰ अहंकारे॥ ॐ क्षेत्रज्ञाय॰ चित्ते॥ ॐ ईश्वराय॰ मनसि॥ इति इंद्रियंन्यासः॥

अथनृसिंहमूलमंत्रस्यदशविधन्यासः॥अस्यश्रीनृसिंहदशविधन्यासस्य॥प्रजाप
तिर्ऋषिः॥अनुष्टुप्छंदः॥श्रीलक्ष्मीनृसिंहोदेवता॥क्ष्रौंबीजं॥ह्रींशक्तिः॥ॐक्लीलकं॥
न्यासेवि नि०॥ॐउंदक्षां गुष्टस्यमूलपर्वे॥ॐग्रंअं॰म॰प॰॥ॐवींअं॰प॰ग्रे॥ॐरंतर्जं॰मू॰
प॰॥ॐमंत॰म॰प॰॥ॐहांत॰प॰ग्रे॥ॐविंम॰मू॰प॰॥ॐष्णुंम॰म॰प॰॥ॐज्वंम॰ग्रप॰॥
ॐलंअना॰मू॰प॰॥ॐतंअ॰म॰प॰॥ॐसंअ॰ग्रप॰॥ॐर्वंकनि॰मू॰प॰॥ॐतोंक॰म॰प॰॥
ॐमुंक॰ग्रप॰॥ॐखंवामकनिष्ठामूलपर्वे॥ॐनृंक॰म॰प॰॥ॐसिंक॰ग्रप॰॥ॐहंअना॰
मू॰प॰॥ॐभींअ॰म॰प॰॥ॐषंअना॰ग्रप॰॥ॐणंमध्य॰मू॰प॰॥ॐभंम॰म॰प॰॥ॐद्रंम
ध्य॰ग्रप॰॥ॐमृंतर्ज॰मू॰प॰॥ॐत्युंत॰म॰प॰॥ॐमृंतर्ज॰ग्रप॰॥ॐत्युंवा॰अंगु॰मू॰प॰॥
ॐनंअं॰म॰प॰॥ॐमांअंगु॰ग्रप॰॥ॐम्यंदक्षकरतले॥ॐहंवामकरतले॥इतिप्रथमः॥ २०

ॐ उं ब्रह्मरंध्रे ॥ ॐ ग्रं शिरसि ॥ ॐ वीं भाले ॥ ॐ रं भ्रूमध्ये ॥ ॐ मं नेत्रयोः ॥ ॐ हां नेत्राधयोः ॥
ॐ विं कपोलौ ॥ ॐ क्ष्मुं कर्णयोः ॥ ॐ ज्वं मस्तके ॥ ॐ लं दंतपंक्तयोः ॥ ॐ तं चुबुके ॥ ॐ सं उत्तरो
ष्ठे ॥ ॐ वं अधरोष्ठे ॥ ॐ तों कंठे ॥ ॐ मुं नाभौ ॥ ॐ खं दक्षिणभुजे ॥ ॐ नं वामभुजे ॥ ॐ सिं
हृदये ॥ ॐ हं स्तनौ ॥ ॐ भीं दक्षकरतले ॥ ॐ षं वामकर० ॥ ॐ णां कक्षौः ॥ ॐ भं मेढ्रयोः ॥
ॐ द्रं ऊर्वोः ॥ ॐ मं जान्वोः ॥ ॐ त्यं जंघयोः ॥ ॐ मं गुल्फयोः ॥ ॐ त्यं पादांगुलिषु ॥ ॐ नं
हस्तांगुलिषु ॥ ॐ मां पर्वसंधिषु ॥ ॐ म्यं रोमकूपेषु ॥ ॐ हं रक्तास्थिमज्जासु ॥ इति द्विती
यः ॥ ॐ उं दक्षपदे ॥ ॐ ग्रं वा० पदे ॥ ॐ वीं द० गुल्फे ॥ ॐ रं वा० गु० ॥ ॐ मं द० जंघे ॥ ॐ हां वा० जं० ॥ ॐ
विं दक्षजानौ ॥ ॐ क्ष्मुं वा० जा० ॥ ॐ ज्वं द० ऊरौ ॥ ॐ लं वामोरौ ॥ ॐ तं द० कक्षां ॥ ॐ सं वा० क० ॥
ॐ वं नाभौ ॥ ॐ तौं हृदि ॥ ॐ मुं दक्षबाहौ ॥ ॐ खं वा० बाहौ ॥ ॐ नं कंठे ॥ ॐ सिं चुबुके ॥ ॐ हं

ऊर्ध्वदंतेषु॥ ॐ क्षीं अधोदंत- ओं षं ऊर्ध्वोष्ठे॥ ॐ णं अधरोष्ठे॥ ॐ भं दक्षकपोले॥ ॐ द्रं वाम
कपोले॥ ॐ मं दक्षकर्णे॥ ॐ स्कं वामकर्णे॥ ॐ मं आस्ये॥ ॐ त्कं दक्षनासापुटे॥ ॐ नं वाम
नासापुटे॥ ॐ मां दक्षनेत्रे॥ ॐ म्यं वामनेत्रे॥ ॐ हं मूर्ध्नि॥ इति तृतीयः॥ ॐ उग्रं शिखा
यां॥ ॐ वीरं मूर्ध्नि॥ ॐ महाविष्णुं नासिकयोः॥ ॐ ज्वलंतं नेत्रयोः॥ ॐ सर्वतोमुखं श्रो
त्रयोः॥ ॐ नृसिंहं मुखे॥ ॐ भीषणं हृदये॥ ॐ भद्रं नाभौ॥ ॐ मृत्युं कट्योः॥ ॐ मृत्युं जा
न्वोः॥ ॐ नमाम्यहं पादयोः॥ इति चतुर्थः॥ ॐ उग्रं वीरं नासाग्रे॥ ॐ महाविष्णुं नयन
योः॥ ॐ ज्वलंतं सश्रोत्रयोः॥ ओं र्वतोमुखं नाभौ॥ ॐ नृसिंहं भी हृदये॥ ॐ षणं भद्रं
मूर्ध्नि॥ ॐ मृत्युमृत्युं बाह्वोः॥ ॐ नमाम्यहं पादयोः॥ इति पंचमः॥ ॐ उग्रं वीरं महावि
ष्णुं मूर्ध्नि॥ ज्वलंतं सर्वतोमुखं वक्षसि॥ ॐ नृसिंहं भीषणं भद्रं नाभौ॥ ॐ मृत्युमृत्युं नमा २१

म्यहं सर्वांगे ॥ इति षष्ठः ॥ ॐ उग्रं ० मुखं मूर्धादिपादांतं ॥ ॐ नृसिं ० म्यहं पादादिमूर्धांतं ॥
इति सप्तमः ॥ ॐ उग्र मुग्रं नमाम्यहं मुखे ॥ ॐ उग्रं वीरं नमा ० शिरसि ॥ ॐ उग्रं महावि
ष्णुं नमा ० नासिके ॥ ॐ उग्रं ज्वलंतं न ० चक्षुषोः ॥ ॐ उग्रं सर्वतोमुखं न ० श्रोत्रयोः ॥ ॐ
उग्रं नृसिंहं न ० शिखायां ॥ ॐ उग्रं भीषणं न ० हृदये ॥ ॐ उग्रं भद्रं न ० नाभौ ॥ ॐ उग्रं मृत्यु
मृत्युं नमाम्यहं कक्षादिपादांतं ॥ इत्यष्टमः ॥ ॐ वीरं उग्रं नमाम्यहं मुखे ॥ ॐ वीरं वीरं नमा
म्यहं शिरसि ॥ ॐ वीरं महाविष्णुं नमा ० नासिके ॥ ॐ वीरं ज्वलंतं न ० चक्षुषोः ॥ ॐ वीरं सर्वतो
मुखं नमा ० श्रोत्रयोः ॥ ॐ वीरं नृसिंहं न ० शिखायां ॥ ॐ वीरं भीषणं न ० हृदये ॥ ॐ वीरं
भद्रं नाभौ ॥ ॐ वीरं मृत्युमृत्युं नमाम्यहं कक्षादिपादांतं ॥ इति नवमः ॥ ॐ नृसिंहं उ
ग्रं नमा ० मुखे ॥ ॐ नृसिंहं वीरं न ० शिरसि ॥ ॐ नृसिंहं महाविष्णुं नासिके ॥ ॐ नृसिंहं ज्व

लं लं नमः॰ चक्षुषोः॥ ॐ नृसिंहं सर्वतोमुखं नमः॰ श्रोत्रयोः॥ ॐ नृसिंहं नृसिंहं नमः॰
शिखायां॥ ॐ नृसिंहं भीषणं नमः॰ हृदये॥ ॐ नृसिंहं भद्रं नमः॰ नाभौ॥ ॐ नृसिंहं
मृत्युमृत्युं नमाम्यहं कट्यादि पादपर्यंतं॥ इति दशमः॥ अथ मूलमंत्रेण प्राणायाम
त्रयं कृत्वा॥ योगपीठन्यासं कुर्यात्॥ मूलाधारे॥ मं मंडूकाय॰ स्वाधिष्ठाने कं कालाग्नि
रुद्राय॰ मणिपूरे मूं मूलप्रकृत्यै॰ हृदये अं आधारशक्त्यै नमः॰ कूं कूर्माय॰ अं अनंताय॰
वं वराहाय॰ पृं पृथिव्यै॰ क्षीं क्षीरसिंधवे॰ श्वें श्वेतद्वीपाय॰ स्वं स्वर्णपर्वताय॰ नं नंद
नोद्यानाय॰ हृदये एव॥ पूर्वे मं मंदाराय॰ दक्षिणे सं संतानकाय॰ पश्चिमे पारिजाता
य॰ उत्तरे कल्पवृक्षाय॰ विचित्र संरत्नभूम्यै॰ स्वर्णप्राकाररम्याय॰ रत्नमंडपाय॰ स्व
र्णवेदिकायै॰ रत्नसिंहासनाय॰ हृदये एव उपरि उपरि भावयेत्॥ इत्येतत्सर्वं नत्तत्था 22

न र
नभावंयाविन्यस्य॥स्वशरीरंअंसद्वयोरुद्वयकल्पितपादचतुष्टयंसुखनाभिपार्श्वद्वयक
ल्पितगात्रचतुष्टयंरत्नसिंहासनंचध्यात्वा॥दक्षिणांसेधर्माय॰वामांसेज्ञानाय॰वा
मोरौवैराग्याय॰दक्षिणोरौऐश्वर्याय॰मुखेअधर्माय॰वामपार्श्वेअज्ञानाय॰नाभौअ
वैराग्याय॰दक्षिणपार्श्वेअनैश्वर्या॰इतिविन्यस्यपुनर्हृदयेमायायै॰विद्यायै॰इतिमा
याविद्येओतप्रोतेनरूपेविचिंत्यतदुपरिसिंहासनमध्येअनंताय॰पद्माय॰आनंदकंदा॰
संविन्नालाय॰प्रकृतिमयपत्रेभ्यो॰विकारमयकेसरेभ्यो॰पंचाशद्वर्णबीजाढ्यसर्वत
त्वरूपायैकर्णिकायै॰अंअर्कमंडलाय॰ऊंसोममंडलाय॰मंवह्निमंडलाय॰संप्रबोधा
त्मनेसत्वाय॰रंप्रकृत्यात्मनेरजसे॰तंमोहात्मनेतमसे॰आंआत्मने॰अंअंतरात्मने॰
पंपरमात्मने॰ह्रींज्ञानात्मने॰सिंहासनस्यचतुर्दिक्षुमध्येचज्ञानतत्वात्मने॰मायात

त्वात्मने॰ कलातत्वात्मने॰ विद्यातत्वात्मने॰ परतत्वात्मने॰ इतिविन्यस्य॥ ॐनमोभगवते
विष्णवेसर्वभूतात्मनेवासुदेवायसर्वात्मसंयोगयोगपीठात्मनेनमः मध्ये॥ तस्मिन्पी
ठेसहस्रादित्यसंकाशंमंत्रंध्यात्वाश्वासमार्गेणांजलावानीयव्यापकंन्यसेत्॥ इतिव्याप
कंन्यासः॥ एवंविन्यस्यविधिवत्साक्षान्नारायणोभवेत्॥ ज्वररोगाभिचाराद्याःप्रल
यंयांतिनान्यथा॥ भूतप्रेतपिशाचाश्चतथैवब्रह्मराक्षसाः॥ कूश्मांडाश्चैवडाकिन्यो
नैवदृष्टुमपिक्षमाः॥ यएवंविन्यसेद्धीमान्विष्णुःसाक्षात्स्वयंभवेत्॥ नातःपरतरंकिं
चित्पावनंपुण्यमस्तिहि॥ ॥मूलेनप्राणायामत्रयंकुर्यात्॥ तद्यथा॥ अस्यश्रीनृ
मंत्र सिंहराजमहामंत्रस्य॥ प्रजापतयेऋषये॰ शिर॰॥ अनुष्टुप्छंदसे॰ मु॰ श्रीलक्ष्मीनृ
सिंहदेवतायै॰ हृ॰॥ हंबीजाय॰ गु॰ ईशक्तये॰ पाद॰॥ ॐकीलकाय॰ सर्वांगे॥ श्रीलक्ष्मीन २३

सिंहप्रसादसिध्यर्थे जपे विनियोगः इति करसंपुटे ॥ मूलेन करादिहृदयादिषडंगं कुर्यात् ॥ ध्या
नं ॥ सत्यज्ञान० ॥ मानसोपचारैः संपूज्य ॥ मूलमंत्रं अष्टोत्तरशतं वारं जपित्वा ॥ वक्ष्यमाण
विधिना जपं समर्प्य श्रीगुरुं प्रणम्य ॥ सामान्यकलशस्थापनं स्वपुरतश्चंदनेनानुलिप्ते श्री
पर्णादिपीठे सौधादिनिर्मिते स्थंडिले वा कुंकुमादिना चक्रं निर्माय तत्र मूलमंत्रेण पुष्पांज
लिं दद्यात् ॥ स्वपुरतः किंचिद्वामभागे चतुरस्रवृत्तत्रिकोणात्मकं मंडलं चंदनानुलिप्तमस्
तले मत्स्यमुद्रया विधाय श्रीनृसिंहस्यार्घाधारमंडलाय नमः इति मंडलं संपूज्य ॥ तत्र वाय
व्यनैर्ऋत्यैशानआग्नेयकोणेषु हृदयाय० शिरसे० शिखायै० कवचाय नमः इति ॥ पुरतः ने
त्राय० स्वाग्रादि चतुर्दिक्षु अस्त्राय नमः इति षडंगानि संपूज्य तत्र मूलमंत्रेण प्रक्षालितम
र्घपात्राधारं श्रीनृसिंहार्घपात्राधारं स्थापयामीति संस्थाप्य मं रं धर्मप्रदशकलात्मने व

ह्निमंडलायश्रीन्रसिंहार्घाधारायनमइतिसंपूज्य॥स्वाग्रादिप्राद‍क्षिण्येनवृत्ताकारेणयंधू
म्रार्चिषेन॰रंऊष्मायै॰लंज्वलिन्यै॰वंज्वालिन्यै॰शंविस्फुलिंगिन्यै॰षंसुश्रियै॰संसुरूपायै॰
हंकपिलायै॰ळंहव्यवाहायै॰क्षंकव्यवाहायै॰इतिवह्निकलाःसंपूज्यास्त्रमंत्रेणस्वर्णादिनि
र्मितंपात्रंशंखंवाप्रक्षाल्यन्रसिंहार्घपात्रंप्रतिष्ठापयामीतितस्मिन्नाधारेसंस्थाप्य॥अं
हंअर्थप्रदद्वादशकलात्मनेसूर्यमंडलायश्रीन्रसिंहार्घपात्रायनमइतितत्पात्रंसंपूज्यतत्र
प्राग्वद्‍वृत्ताकारेणप्राद‍क्षिण्येनकंभंतपिन्यै॰खंबंतापिन्यै॰गंफंधूम्रायै॰घंपंमरीच्यै॰
ङंनंज्वालिन्यै॰चंधंरुच्यै॰छंदंसुषुम्णायै॰जंथंभोगदायै॰झंतंविश्वायै॰ञंणंबोधिन्यै॰
टंढंधारिण्यै॰ठंडंक्षमायैनमइतिसंपूज्यक्षंळंहंसंषंशंवंलंरंयंमंभंबंफंपंनंधंदंथंतंणं
ढंडंठंटंञंझंजंछंचंङंघंगंखंकंअंःअंऔंओंऐंएंॡंऌंॠंऋंऊंउंईंइंआंअंइत्यंतेमूलमंत्र २४

त्रिर्जपन्नस्त्रुक्षोदकैः श्रीनृसिंहार्घपात्रं पूरयामीतिसंपूर्य तत्र गंधपुष्पाक्षतयवकुशाग्रति
लसर्षपदूर्वा इत्यर्घद्रव्याष्टकं निक्षिप्य ॥ ॐ सं कामप्रदषोडशकलात्मने सोममंडलाय श्री
नृसिंहार्घामृतायनम इति तज्जलं संपूज्य तत्र प्रागवर्त्तत्ताकारेण प्रादक्षिण्येन अं अमृ
तायै॰ आं मानदायै॰ इं पूषायै॰ ईं तुष्ट्यै॰ उं पुष्ट्यै॰ ऊं रत्यै॰ ऋं धृत्यै॰ ॠं शशिन्यै॰ लृं चंद्रिका
यै॰ ॡं कांत्यै॰ एं ज्योत्स्नायै॰ ऐं श्रियै॰ ओं प्रीत्यै॰ औं मंगलायै॰ अं पूर्णायै॰ अः पूर्णामृ
तायै॰ इति संपूज्य ॥ सूर्यमंडलात्तीर्थमावाह्य गंगेचयमु॰ मूलमंत्रेण तदर्घजलं संयो
ज्य ॥ शिखामंत्रेण गालिनीमुद्रां प्रदर्श्य एवमितिधेनुमुद्रया अमृतीकृत्य तत्र देवं ध्यात्वा
षडंगमंत्रान्देवस्य देहे हृदयादिषु विन्यस्यावगुंठणमुद्रयां कवचेनावगुंठ्य नेत्रमंत्रेण वी
